# Devendrakritam Shatarudriyam Nama Shiva Stotram

# દેવેન્દ્રકૃતં શતરુદ્રીયં નામ શિવસ્તોત્રમ્

## Document Information

Text title : Devendrakritam Shatarudriyam Nama Shiva Stotram

File name : devendrakRRitaMshatarudrIyaMnAmashivastotram.itx

Category : shiva, mahAbhArata, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | droNaparva | adhyAya 173/65-105||

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 15, 2025

*sanskritdocuments.org*

# દેવેન્દ્રકૃતં શતરુદ્રીયં નામ શિવસ્તોત્રમ્

સ વૈ રુદ્રઃ સ ચ શિવઃ સોઽગ્નિઃ શર્વઃ સ સર્વવિત્ ।
સ ચેન્દ્રશ્ચૈવ વાયુશ્ચ સોઽશ્વિનૌ સ ચ વિદ્યુતઃ ॥ ૬૫॥

સ ભવઃ સ ચ પર્જન્યો મહાદેવઃ સ ચાનઘઃ ।
સ ચન્દ્રમાઃ સ ચેશાનઃ સ સૂર્યો વરુણશ્ચ સઃ ॥ ૬૬॥

સ કાલઃ સોઽન્તકો મૃત્યુઃ સ યમો રાત્ર્યહાનિ ચ ।
માસાર્ધમાસા ઋતવઃ સન્ધ્યે સંવત્સરશ્ચ સઃ ॥ ૬૭॥

સ ચ ધાતા વિધાતા ચ વિશ્વાત્મા વિશ્વકર્મકૃત્ ।
સર્વાસાં દેવતાનાં ચ ધારયત્યવપુર્વપુઃ ॥ ૬૮॥

સર્વૈર્દેવૈઃ સ્તુતો દેવઃ સૈકધા બહુધા ચ સઃ ।
શતધા સહસ્રધા ચૈવ તથા શતસહસ્રધા ॥ ૬૯॥

ઈદૃશઃ સ મહાદેવો ભૂયશ્ચ ભગવાનજઃ ।
ન હિ સર્વે મયા શક્યા વક્તું ભગવતો ગુણાઃ ॥ ૭૦॥

સર્વૈર્ગ્રહૈર્ગૃહીતાન્વૈ સર્વપાપસમન્વિતાન્ ।
સ મોચયતિ સુપ્રીતઃ શરણ્યઃ શરણાગતાન્ ॥ ૭૧॥

આયુરારોગ્યમૈશ્વર્યં વિત્તં કામાંશ્ચ પુષ્કલાન્ ।
સ દદાતિ મનુષ્યેભ્યઃ સ ચૈવાક્ષિપતે પુનઃ ॥ ૭૨॥

સેન્દ્રાદિષુ ચ દેવેષુ તસ્ય ચૈશ્વર્યમુચ્યતે ।
સ ચૈવ વ્યાહૃતે લોકે મનુષ્યાણાં શુભાશુભે ॥ ૭૩॥

ઐશ્વર્યાચ્ચૈવ કામાનામીશ્વરઃ પુનરુચ્યતે ।
મહેશ્વરશ્ચ ભૂતાનાં મહતામીશ્વરશ્ચ સઃ ॥ ૭૪॥

બહુભિર્બહુધા રૂપૈર્વિશ્વં વ્યાપ્નોતિ વૈ જગત્ ।
અસ્ય દેવસ્ય યદ્વક્ત્રં સમુદ્રે તદતિષ્ઠત ॥ ૭૫॥

એષ ચૈવ શ્મશાનેષુ દેવો વસતિ નિત્યશઃ ।
યજન્ત્યેનં જનાસ્તત્ર વીરસ્થાન ઇતીશ્વરમ્ ॥ ૭૬॥

અસ્ય દીપ્તાનિ રૂપાણિ ઘોરાણિ ચ બહૂનિ ચ ।
લોકે યાન્યસ્ય કુર્વન્તિ મનુષ્યાઃ પ્રવદન્તિ ચ ॥ ૭૭॥

નામધેયાનિ લોકેષુ બહૂન્યત્ર યથાર્થવત્ ।
નિરુચ્યન્તે મહત્ત્વાચ્ચ વિભુત્વાત્કર્મભિસ્તથા ॥ ૭૮॥

વેદે ચાસ્ય સમામ્નાતં શતરુદ્રીયમુત્તમમ્ ।
નામ્ના ચાનન્તરુદ્રેતિ ઉપસ્થાનં મહાત્મનઃ ॥ ૭૯॥

સ કામાનાં પ્રભુર્દેવો યે દિવ્યા યે ચ માનુષાઃ ।
સ વિભુઃ સ પ્રભુર્દેવો વિશ્વં વ્યાપ્નુવતે મહત્ ॥ ૮૦॥

જ્યેષ્ઠં ભૂતં વદન્ત્યેનં બ્રાહ્મણા મુનયસ્તથા ।
પ્રથમો હ્યેષ દેવાનાં મુખાદસ્યાનલોઽભવત્ ॥ ૮૧॥

સર્વથા યત્પશૂન્પાતિ તૈશ્ચ યદ્રમતે પુનઃ ।
તેષામધિપતિર્યચ્ચ તસ્માત્પશુપતિઃ સ્મૃતઃ ॥ ૮૨॥

નિત્યેન બ્રહ્મચર્યેણ લિઙ્ગમસ્ય યદા સ્થિતમ્ ।
મહયન્તિ ચ લોકાશ્ચ મહેશ્વર ઇતિ સ્મૃતઃ ॥ ૮૩॥

ઋષયશ્ચૈવ દેવાશ્ચ ગન્ધર્વાપ્સરસસ્તથા ।
લિઙ્ગમસ્યાર્ચયન્તિ સ્મ તચ્ચાપ્યૂર્ધ્વં સમાસ્થિતમ્ ॥ ૮૪॥

પૂજ્યમાને તતસ્તસ્મિન્મોદતે સ મહેશ્વરઃ ।
સુખી પ્રીતશ્ચ ભવતિ પ્રહૃષ્ટશ્ચૈવ શઙ્કરઃ ॥ ૮૫॥

યદસ્ય બહુધા રૂપં ભૂતભવ્યભવત્સ્થિતમ્ ।
સ્થાવરં જઙ્ગમં ચૈવ બહુરૂપસ્તતઃ સ્મૃતઃ ॥ ૮૬॥

એકાક્ષો જાજ્વલન્નાસ્તે સર્વતોઽક્ષિમયોઽપિ વા ।
ક્રોધાદ્યશ્ચાવિશલ્લોકાંસ્તસ્માચ્છર્વ ઇતિ સ્મૃતઃ ॥ ૮૭॥

ધૂમ્રં રૂપં ચ યત્તસ્ય ધૂર્જટિસ્તેન ઉચ્યતે ।
વિશ્વે દેવાશ્ચ યત્તસ્મિન્વિશ્વરૂપસ્તતઃ સ્મૃતઃ ॥ ૮૮॥

તિસ્રો દેવીર્યદા ચૈવ ભજતે ભુવનેશ્વરઃ ।
દ્યામપઃ પૃથિવીં ચૈવ ત્ર્યમ્બકશ્ચ તતઃ સ્મૃતઃ ॥ ૮૯॥

સમેધયતિ યન્નિત્યં સર્વાર્થાન્સર્વકર્મસુ ।
શિવમિચ્છન્મનુષ્યાણાં તસ્માદેષ શિવઃ સ્મૃતઃ ॥ ૯૦॥

સહસ્રાક્ષોઽયુતાક્ષો વા સર્વતોઽક્ષિમયોઽપિ વા ।
યચ્ચ વિશ્વં મહત્પાતિ મહાદેવસ્તતઃ સ્મૃતઃ ॥ ૯૧॥

દહત્યૂર્ધ્વં સ્થિતો યચ્ચ પ્રાણોત્પત્તિસ્થિતશ્ચ યત્ ।
સ્થિતલિઙ્ગશ્ચ યન્નિત્યં તસ્માત્સ્થાણુરિતિ સ્મૃતઃ ॥ ૯૨॥

વિષમસ્થઃ શરીરેષુ સમશ્ચ પ્રાણિનામિહ ।
સ વાયુર્વિષમસ્થેષુ પ્રાણાપાનશરીરિષુ ॥ ૯૩॥

પૂજયેદ્વિગ્રહં યસ્તુ લિઙ્ગં વાપિ સમર્ચયેત્ ।
લિઙ્ગં પૂજયિતા નિત્યં મહતીં શ્રિયમશ્નુતે ॥ ૯૪॥

ઊરુભ્યામર્ધમાગ્નેયં સોમાર્ધં ચ શિવા તનુઃ ।
આત્મનોઽર્ધં ચ તસ્યાગ્નિઃ સોમોઽર્ધં પુનરુચ્યતે ॥ ૯૫॥

તૈજસી મહતી દીપ્તા દેવેભ્યશ્ચ શિવા તનુઃ ।
ભાસ્વતી માનુષેષ્વસ્ય તનુર્ઘોરાગ્નિરુચ્યતે ॥ ૯૬॥

બ્રહ્મચર્યં ચરત્યેષ શિવા યાસ્ય તનુસ્તયા ।
યાસ્ય ઘોરતરા મૂર્તિઃ સર્વાનત્તિ તયેશ્વરઃ ॥ ૯૭॥

યન્નિર્દહતિ યત્તીક્ષ્ણો યદુગ્રો યત્પ્રતાપવાન્ ।
માંસશોણિતમજ્જાદો યત્તતો રુદ્ર ઉચ્યતે ॥ ૯૮॥

એષ દેવો મહાદેવો યોઽસૌ પાર્થ તવાગ્રતઃ ।
સઙ્ગ્રામે શાત્રવાન્નિઘ્નંસ્ત્વયા દૃષ્ટઃ પિનાકધૃક્ ॥ ૯૯॥

એષ વૈ ભગવાન્દેવઃ સઙ્ગ્રામે યાતિ તેઽગ્રતઃ ।
યેન દત્તાનિ તેઽસ્ત્રાણિ યૈસ્ત્વયા દાનવા હતાઃ ॥ ૧૦૦॥

ધન્યં યશસ્યમાયુષ્યં પુણ્યં વેદૈશ્ચ સંજ્ઞિતમ્ ।
દેવદેવસ્ય તે પાર્થ વ્યાખ્યાતં શતરુદ્રિયમ્ ॥ ૧૦૧॥

સર્વાર્થસાધકં પુણ્યં સર્વકિલ્બિષનાશનમ્ ।
સર્વપાપપ્રશમનં સર્વદુઃખભયાપહમ્ ॥ ૧૦૨॥

ચતુર્વિધમિદં સ્તોત્રં યઃ શ◌ૃણોતિ નરઃ સદા ।

વિજિત્ય સર્વાઞ્શત્રૂન્સ રુદ્રલોકે મહીયતે ॥ ૧૦૩॥

ચરિતં મહાત્મનો દિવ્યં સાઙ્ગ્રામિકમિદં શુભમ્ ।
પઠન્વૈ શતરુદ્રીયં શૃણ્વંશ્ચ સતતોત્થિતઃ ॥ ૧૦૪॥

ભક્તો વિશ્વેશ્વરં દેવં માનુષેષુ તુ યઃ સદા ।
વરાન્સ કામાઁલ્લભતે પ્રસન્ને ત્ર્યમ્બકે નરઃ ॥ ૧૦૫॥

ઇતિ મહાભારતે દ્રોણપર્વણિ ૧૭૩ અધ્યાયાન્તર્ગતં
દેવેન્દ્રકૃતં શતરુદ્રીયં નામ શિવસ્તોત્રં સમ્પૂર્ણમ્ ।

મહાભારત । દ્રોણપર્વ । અધ્યાય ૧૭૩/૬૫-૧૦૫॥

mahAbhArata . droNaparva . adhyAya 173/65-105..

Proofread by PSA Easwaran

*Devendrakritam Shatarudriyam Nama Shiva Stotram*
pdf was typeset on November 15, 2025

Please send corrections to *sanskrit@cheerful.com*